Postal Regd.No. GAMC- 1553/2022-2024 ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्षः १९ अङ्कः २२४
डिसेम्बर - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### निसर्गस्य पूजनम्

काका कालेलकरः लिखति – कश्चित् ग्राम्यः बालकः मां पृष्टवान् – 'भवान् उपरि किं पश्यति ?' मया अपि उक्तम् 'आकाशे ताराः पश्यामि।' बालकः वदति – 'तत्र दर्शनीयं किम् ? ताराः प्रतिसायम् उदयन्ति, अस्तं च यान्ति। तासां दर्शनेन कः लाभः ? भवान् स्वीयां ग्रीवां वृथा पीडयति !'

लेखकः ततः लिखति – अहं चिन्तितवान् यत् एषः ग्राम्यः बालकः तारादर्शनेन अनुभूयमानम् आनन्दं कथं जानीयात् ? पशवः अपि रात्रौ तारादर्शनं कुर्युः। परन्तु ते तत्र उत्साहं प्राप्नुयुः किम् ? तदर्थं तु उच्चस्तरीयं शिक्षणम् आवश्यकम्। ताराणां भव्यं दर्शनम्, ताराणां काव्यम्, ताराणां शान्तिः तासां च आध्यात्मिकः सन्देशः – एतत् सर्वं नितराम् अबुधाः ग्राम्यजनाः किं जानीयुः ?

लेखकः कतिपयदिनेभ्यः अनन्तरं ग्रामात् महानगरं गतवान्। तदा तं बालकं गृहसेवार्थं नीतवान्। बालकः महानगरे लेखकेन सह एव वासं करोति स्म। गृह्यैः अन्यैः बालकैः सह क्रीडन् सः रात्रौ प्रकोष्ठे स्वपिति स्म। सेवकेन सह आत्मवत् वर्तितव्यम् इति शास्त्रं संस्मरन् लेखकः बालकं प्रति वात्सल्येन वर्तते स्म।

केचन दिवसाः एवमेव व्यतीताः। अथ कदाचित् खिन्नमनाः बालकः लेखकम् उपगम्य उक्तवान् – 'अहम् अत्र वासं कर्तुं न इच्छामि।' अकल्पितं वाक्यं श्रुत्वा लेखकः साश्चर्यं पृष्टवान् – 'भवतः किं कष्टम् ? भोजनं न रोचते किम् ?' कोऽपि पीडयति वा ?' बालकः क्षणं मौनं धृत्वा, कानिचन वाक्यानि कथञ्चित् उद्गीर्णवान् – 'अत्र सर्वविधं सुखं वर्तते। परन्तु पशूनां पृष्ठे धावनेन यः आनन्दः जायते, सः अत्र नास्ति। अपि च रात्रौ शयनकाले उपरि ताराः न दृश्यन्ते।' परन्तु त्वमेव पूर्वम् उक्तवान् यत् ताराणां दर्शनं निरर्थकम् इति पृष्टे सति बालकः उक्तवान् – 'तत् सत्यम्, किन्तु ताराणाम् उपस्थितिः आवश्यकी। ताभ्यः विना न रोचते। निद्रा च न भवति।'

वस्तुतः संस्थासु शिक्षणं प्राप्तवन्तः जनाः आकाशस्य विषये बहुविधं जानन्ति। ते बुद्धिम् आश्रित्य ग्रन्थान् अपि लिखन्ति। परन्तु तेषां जीवनम् आकाशेन सह ऐक्यं साधयति किम् ? नक्षत्रविद्या पण्डितानां जीवने कियन्तं महिमानं तनोति ? अबुधः ग्राम्यः बालकः नक्षत्रविज्ञानं न शिक्षितवान्। तथापि यत् तत्त्वं बालकः स्वभावतः जानाति, तत् निसर्गस्य सहृदयं विहितं पूजनम् अस्ति।

# युवराजस्य अक्षराभ्यासः

**– जातककथा**



सूर्यसेनः विन्ध्यगिरिनामकस्य राज्यस्य राजा। धार्मिकः सः सर्वदा प्रजाहिते निरतः। अतः धनस्य अधिकं भागं जनानां हिताय व्ययीकरोति स्म सः। एतस्मात् कारणात् देशस्य कोशः रिक्तः अभवत्। कोशपूरणाय जनेभ्यः करं स्वीकर्तुं राजा न इच्छति स्म। अतः कोशपूरणे कः उपायः आश्रयणीयः इति सः चिन्तां प्राप्नोत्।

विन्ध्यगिरिराज्यस्य पार्श्वे विदर्भराज्यं वैशालीराज्यं च अस्ति। तयोः राज्ययोः राजानौ चन्द्रकान्तः महीधरश्च विन्ध्यगिरेः आर्थिकदौर्बल्यं ज्ञातवन्तौ। तौ उभौ अपि स्वराज्यसीमानं विस्तारयितुम् इच्छतः स्म। तयोः आकाङ्क्षा आसीत् यत् प्रथमं विन्ध्यगिरिम् आक्रम्य तत् राज्यं स्वाधीनीकृत्य ततः अन्यस्य राज्यम् अपि वशीकरणीयम् इति। एतदर्थं तौ योजनाम् अपि कुर्वन्तौ आस्ताम्।

सूर्यसेनेन एषः विषयः गुप्तचरद्वारा ज्ञातः। सूर्यसेनः कुशलः राजनीतिज्ञः। अतः प्राप्तं युद्धं दूरीकर्तुं सः उपायं चिन्तितवान्। तदा उत्तमः कश्चन अवसरः तेन प्राप्तः।

सूर्यसेनस्य पुत्रः जयन्तः चतुर्वर्षीयः। पुत्रस्य अक्षराभ्यासमहोत्सवः राजपुरोहितेन शुभे मुहूर्ते निश्चितः। एतं प्रसङ्गं सफलं कर्तुम् इष्टवान् सूर्यसेनः। अतः सः शत्रुराजौ चन्द्रकान्तमहीधरौ एतं कार्यक्रमं प्रति निमन्त्रयितुम् ऐच्छत्। द्वाभ्यां सह मैत्रीं सम्पादयितुं तेन निमन्त्रणं प्रेषितम् अपि।

उभौ अपि एतादृशं समयमेव निरीक्षमाणौ आस्ताम्। येनकेनापि व्याजेन सूर्यसेनेन सह कलहम् उत्पाद्य युद्धघोषणा करणीया इति तयोः चिन्तनम् आसीत्। अतः उभौ अपि युवराजस्य जयन्तस्य अक्षराभ्याससमारम्भार्थम् आगतौ।

आगतौ अतिथी सादरं सत्कृतवान् सूर्यसेनः। आगमनदिनं स्नेहपूर्णवातावरणेन पूर्णम् आसीत्।

आतिथ्यानन्तरं विदर्भराजः चन्द्रकान्तः स्वर्णमयं फलकमेकं ददत् सूर्यसेनम् उक्तवान् – "अक्षराभ्यासं कर्तुं युवराजः अस्य उपयोगं करोतु" इति।

वैशालीराजः महीधरः अपि हस्तिदन्तैः निर्मितमेकं फलकं ददत् – "सरस्वतीमन्दिरे पूजां प्राप्य आगतं फलकम् इदम्। युवराजः अनेन अक्षराभ्यासं करोति चेत् विद्यावान् भवेत्" इति उक्तवान्।

इदानीं समस्या उत्पन्ना। तथापि सूर्यसेनः मृदु हसन् "भवतोः उभयोः कृते अपि अहं कृतज्ञतां समर्पयामि"

इति उक्तवान्। चन्द्रकान्तः महीधरश्च वासस्थानं गतौ। चन्द्रकान्तस्य मनसि विचारः प्रवृत्तः – 'सूर्यसेनः स्वपुत्रस्य अक्षराभ्यासं महीधरेण दत्ते फलके एव कारयतु। तदा तमेव विषयं स्वीकृत्य मम अपमानः सञ्जातः इति व्याजं कथयन् अहं युद्धघोषणां करिष्यामि' इति।

महीधरस्य चिन्तनमपि अस्यामेव दिशि प्रवृत्तम्। सूर्यसेनेन सह कलहस्य उत्पादनाय अवसरः प्राप्येत इति।

फलकदानप्रसङ्गेन सूर्यसेनः द्वयोः अपि राज्ञोः उद्देशं झटिति ज्ञातवान्। किन्तु अस्याः परिस्थितेः सम्मुखीकरणं कथमिति सः न ज्ञातवान्।

अक्षराभ्यासस्य शुभदिनम् आगतम्। राज्यस्य परम्परानुगुणं जनतायाः आशीर्वादं प्राप्तुम् राजकुमारः पित्रा सह अलङ्कृतस्य गजस्य उपरि उपविश्य प्रस्थितः। राजमार्गे पार्श्वद्वये अपि जनाः स्थिताः आसन्। ते पुष्पाणि वर्षन्तः युवराजम् आशिषा अनुगृहीतवन्तः।

तस्मिन् समये राज्ञः दृष्टिः अकस्मात् कस्मिंश्चित् बाले पतिता। पञ्चवर्षीयः सः हस्तेन एकं फलकं गृह्णन् राजकुमारमेव पश्यन् रोदिति स्म। तं सान्त्वयितुं तस्य माता बहुधा प्रयतमाना आसीत्।

सूर्यसेनः हस्तिपकं सूचितवान् यत् हस्तिनं स्थगयतु इति। हस्तिपकः तथैव अकरोत्। राजा हस्तितः अवतीर्य रुदतः बालकस्य समीपं गतः। राजानं पश्यन्ती बालकस्य माता भीता सती – ''क्षम्यतां महाराज! अस्मिन् शुभे अवसरे रोदनम् अनुचितम्। किन्तु अहं विवशा अस्मि'' इति वदन्ती क्षमां याचितवती। 'भीतिः मास्तु। एषः बालः किमर्थं रोदिति?' इति पृष्टवान् महाराजः। ''एषः मां पृष्टवान् – मातः! राजा युवराजश्च किमर्थं गजारूढौ आगतौ? इति। मया उक्तम् – अद्य युवराजस्य अक्षराभ्यासमहोत्सवः। अतः प्रजाभ्यः आशीर्वादं स्वीकर्तुं तौ आगतौ इति। तत् श्रुत्वा एषः – अहम् एतत् फलकं युवराजाय ददाम्येव इति वदन् फलकं स्वीकृत्य अत्र आगतः अस्ति'' इति।

एतत् वचनं श्रुत्वा सूर्यसेनः अतीव हृष्टः अभवत्। मनसि एव सः अचिन्तयत्– 'मुग्धः एषः बालः प्रीत्या युवराजाय लेखनफलकं दातुम् इच्छति। एषः महतः आनन्दस्य विषयः। प्रीतिपूर्वकं दानात् ऋते अन्यत् किमपि श्रेष्ठतां न भजति' इति।

ततः सः तं बालकं प्रेम्णा आहूय पृष्टवान् ''भवतः नाम किम्?'' इति।

बालकः अश्रूणि मार्जयन् – ''सुदामा'' इति उक्तवान्।

''सुदामन्। भवान् रोदनं स्थगयतु। हसन्मुखः सन् भवान् तत् लेखनफलकं युवराजाय ददातु'' इति सूर्यसेनेन उक्तम्।

सुदामा महता सन्तोषेण स्वेन आनीतं लेखनफलकं युवराजाय दत्तवान्। राजा सुदाम्नः मातरम् उक्तवान् – ''राजभवने रात्रौ समारम्भः भविष्यति। तदर्थम् अवश्यं पुत्रेण सह भवत्या आगन्तव्यम्'' इति।

'एतयोः आनयनं भवता करणीयम्' इति कञ्चन अधिकारिणम् उक्तवान् सः।

शोभायात्रा समाप्ता। राजभवने युवराजस्य अक्षराभ्यासकार्यक्रमः आरब्धः। राजपुरोहितः युवराजेन अक्षरं लेखयितुं लेखनफलकं पृष्टवान्। चन्द्रकान्तमहीधरयोः महत् कुतूहलम् – केन उपायनीकृतस्य लेखनफलकस्य उपयोगः इदानीं भवेत् इति।

तदा सूर्यसेनः उत्थाय आगतान् राज्ञः पश्यन् उक्तवान् – ''युवराजस्य अक्षराभ्यासमहोत्सवे भागं ग्रहीतुं विशेषातिथिरूपेण राजा चन्द्रकान्तः, राजा महीधरश्च आगतौ स्तः। मम पुत्रस्य विद्याभिवृद्धिम् इच्छतोः एतयोः एकेन स्वर्णमयफलकम्, अपरेण सरस्वतीमन्दिरे पूजितं हस्तिदन्तनिर्मितं फलकं च दत्तम्। तयोः अहं धन्यवादं समर्पयामि। राज्यपरम्परानुसारं यदा अहं पुत्रश्च जनतायाः आशीर्वादं प्राप्तुम् गतौ तदा सुदामनामकः कश्चित् निर्धनबालकः स्वसमीपे स्थितं लेखनफलकं राजपुत्राय दातुम् इष्टवान्। अहं स्वयं तत् लेखनफलकं स्वीकृतवान्। इदानीम् अत्र त्रीणि लेखनफलकानि सन्ति। प्रजानाम् इच्छा एव अस्माकम् इच्छा। अतः भवन्तः एव वदन्तु – मया कस्य वा लेखनफलकस्य उपयोगः करणीयः एतदवसरे'' इति।

यावत् प्रतिवेशिराजौ किमपि वक्तुम् उद्युक्तौ तावता तत्र सम्मिलितेषु सभासत्सु कश्चन उक्तवान् – ''अस्माकं राजा धर्मप्रभुः। धनिकनिर्धनयोः विषये समाना प्रवृत्तिः तस्य। मुग्धः सुदामा यत् लेखनफलकं दत्तवान् तत्र एव अद्य युवराजस्य अक्षराभ्यासः भवतु इति अस्माकम् इच्छा'' इति। तदा सभा हर्षध्वनिना एतत् कथनम् अन्वमोदयत्। राजा सूर्यसेनः इदानीम् आतङ्करहितः अभवत्। 'यदि एकेन राज्ञा दत्तं फलकम् उपयुक्तं स्यात् तर्हि अपरः राजा मह्यं प्रकुप्य युद्धाय सन्नद्धः जातः स्यात्। सुदाम्ना दत्तं फलकम् उपयुज्येत चेत् उभौ अपि राजानौ कुपितौ स्याताम्। किन्तु इदानीं तु प्रजाभिः एव मम मार्गदर्शनं कृतम् अस्ति' इति विचिन्त्य तमेव मार्गम् अनुसृत्य राजा यशः प्राप्तवान्।

युवराजस्य अक्षराभ्यासः सुदाम्ना दत्ते फलके एव अभवत्। चन्द्रकान्तमहीधरौ ज्ञातवन्तौ यत् सूर्यसेनः प्रजासु नीचस्तरे स्थितं जनमपि कथम् इच्छति, प्रजाः अपि महाराजं कियता गौरवेण पश्यन्ति इति। एतादृशम् अनन्यसदृशं प्रेम, आदरं च दृष्ट्वा तौ आश्चर्यान्वितौ अभवताम्। 'राज्ञः आर्थिकबलं, सैनिकबलं च प्रजानां प्रीतेः सम्मुखे तृणप्रायम्' इति तौ ज्ञातवन्तौ। 'सूर्यसेनः स्वप्रजाः पुत्रान् इव पालयति। अतः एव प्रजानामपि राज्ञि तावान् एव आदरः, प्रीतिश्च।

एतादृशस्य सूर्यसेनस्य विषये शत्रुत्वं धर्मविरुद्धं नीतिरहितं च' इति चिन्तनम् उत्पन्नं तयोः मनसि। अतः उभौ अपि तस्य मैत्रीम् इष्ट्वा सुहृदौ अभूताम्।

ततः सूर्यसेनोऽपि विदर्भराजं, वैशालीराजं च योग्यरीत्या सम्मान्य अमूल्यानि उपायनानि दत्त्वा ससन्तोषं तौ प्रेषितवान्।

सूर्यसेनः पूर्वं चिन्तितवान् आसीत् – समस्या गभीरा अस्ति, अतः तस्याः परिणामः अपि घोरः एव स्यात् इति। किन्तु बालकस्य सुदाम्नः कारणात् समस्या विना क्लेशं परिहृता अभवत्। अतः राजा सुदाम्नः विद्याभ्यासस्य निमित्तं योग्यां व्यवस्थां कारितवान्।

## बालचरितम् ( ग्रन्थपरिचयः )

व्योम शाहः

यस्य कृतिकलापसुवर्णे जनान् प्रीणयति मति अन्येषां कवीनां कृतयः कांस्यम् इव अभासन्, तस्य महाकविभासस्य नाटकचक्रात् ''बालचरितम्'' इति नामधेये नाटके उपक्रमामहे ज्ञातुम्।

**कृतिप्रकारः** – प्रतिमा–ऽभिषेकादिवद् इदमपि रूपकं साहित्यदर्पणोक्तेषु दशसु रूपकेषु 'नाटकम्' इति प्रकारेऽन्तर्भवति। अत्र धीरोदात्तः नायकः वीरः च मुख्यः रसः।

**कृतेः आधारसामग्रीः** – अस्याः कृते मुख्या आधारसामग्री का इति स्पष्टतया न ज्ञायते। बहवोऽपि अत्र प्रसङ्गाः कवेः मौलिकाः एव यतः न तस्य उल्लेखः हरिवंशे वा पुराणेषु वा प्राप्यते।

**कृतेः अभिधानम्** –बालस्य (कृष्णस्य) चरितं (जीवनम्) अस्ति अस्मिन् इति बालचरितम्।

**नाटके पात्राणि** – नारदः, वसुदेवः, नन्दगोपः, उग्रसेनः, गरुडः, कंसः इत्यादीनि मुख्यानि पुरुषपात्राणि। देवकी, धात्री कात्यायनी इत्यादीनि मुख्यानि स्त्रीपात्राणि।

**नाटकसारः** – नाटकस्य प्रारम्भे सूत्रधारः मङ्गलं विधाय नेपथ्ये शब्दे श्रुते सति नारदस्य आगमनं सूचयित्वा निर्गच्छति। (प्रयोगातिशयः इति प्रस्तावनाभेदोऽत्र प्रयुक्तः।) स्वर्लोके बहुमतः कलहप्रियः नारदः कंसवधार्थं मानुषं रूपं धरन्तं भगवन्तं नारायणं द्रष्टुम् आगतः। वसुदेवेन सह गतवत्याः देवक्याः हस्ते बालं नारायणं दृष्ट्वा सः हृष्टः। ताम् ऋज्वीं मन्यमानः सः अचिन्तयत् –

**''लोकानामभयकरं गुरुं सुराणां दैत्यानां निधनकरं रथाङ्गपाणिम्।**
**शोकार्ता शशिवदना निशि प्रशान्ता बाहुभ्यां गिरिमिव मन्दरं वहन्ती॥**

षण्णां सुतानां मृत्योः ऊर्ध्वं देवकी सप्तमं पुत्रं रक्षितुम् उद्युता। देवक्या सह संलप्य मथुरायां सर्वासु प्रजासु सुप्तासु वसुदेवः बालं गृहीत्वा निर्गन्तुम् आरभत। तदानीं सर्वत्र गाढः अन्धकारः। सः कथञ्चित् यमुनां नदीं प्राप्य आत्मनः परिश्रमस्य व्यर्थत्वम् अचिन्तयत्। तदैव सहसा तत्र नदीजलं द्विधा छिन्नम्। सः नदीम् उत्तीर्य परं तटं प्राप्य समीपस्थ ग्रामम् अगच्छत् यत्र तस्य मित्रं – 'नन्दगोपः' न्यवसत्। वसुदेवेन सङ्कल्पः कृतः यद् यदि लोकहितार्थं कंसवधार्थं च वृष्णिकुले बालोऽयं प्रसूतः तर्हि नन्दगोपः स्वयमेव आगच्छतु इति। तदैव दारिकां हस्तयोः गृहीत्वा नन्दगोपः रुदन् समागच्छति। रोदनस्य कारणं पृष्टे सति नन्दगोपः वसुदेवाय निवेदयति यत् तस्य भार्यया प्रसूता दारिका जातमात्रा एव प्राणान् अमुञ्चत्। वसुदेवः तां तत्रैव त्यक्तुं निवेदयति। पुनश्च स्वीयं वृत्तान्तं कथयित्वा आत्मनः पुत्रं तस्मै समर्पयति। पूर्वं बालकं ग्रहीतुम् असमर्थः तस्मै प्रार्थनां विधाय ग्रहीतुं समर्थः भवति। ततः गरुड–चक्र–शार्ङ्ग–कौमोदकी–शङ्ख–नन्दकाः तत्र आगत्य तं स्तुवन्ति गोपालरूपेण अवतरितुं निश्चयं कुर्वन्ति। यावत् वसुदेवः प्रतिनिवर्तते तावत् रोदनस्य ध्वनिः श्रुतः। नन्दगोपस्य दारिका रोदितुं प्रारभत। वसुदेवः कंसं वञ्चितुं तां गृहीत्वा पुनरपि मथुरां नगरीं गच्छति। अनेन प्रथमाङ्कस्य समाप्तिः भवति। **( क्रमशः... )**

## कृपया हसन्तु

**वर्गान्ते शिक्षकः - "यदि किमपि प्रष्टुम् इच्छन्ति तर्हि इदानीमेव पृच्छन्तु...।" इति छात्रान् अवदत् । तदैव-**

**रमणः - महोदय, भवान् कं विषयं पाठयन् आसीत् ?**

★ ★ ★ ★ ★

**पत्नी - किं त्वं भोजनम् अकरोः ?**

**पतिः - किं त्वं भोजनम् अकरोः ?**

**पत्नी - अहं त्वां पृच्छामि ।**

**पतिः - अहं त्वां पृच्छामि ।**

**पत्नी - किं मम अनुकरणं करोषि ?**

**पतिः - किं मम अनुकरणं करोषि ?**

**पत्नी - अस्तु, चल स्वर्णहारं क्रेतुं चलाव ।**

**पतिः - आम्, आम् । अहं भोजनं कृतवान् ।**



★ ★ ★ ★ ★

**कश्चन भिक्षुकः नमनम् उपगम्य, 'भोः महोदय,कृपया १० रूप्यकाणि ददातु ।'**

**नमनः - मम समीपे १०० रूप्यकाणि सन्ति । किं तव समीपे १०० रूप्यकाणां परिवर्तः अस्ति ?**

**भिक्षुकः - आम् अस्ति... ।**

**नमनः - तर्हि पूर्वं तानि व्ययीकरोतु ततः याचितुम् आगच्छतु !!!**

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**यस्तु सञ्चरते देशान् यस्तु सेवेत पण्डितान् ।**
**तस्य विस्तारिता बुद्धिः तैलबिन्दुरिवाम्भसि ॥**

**तात्पर्यम्** – यः देशविदेशेषु सञ्चरति, ज्ञानिनां सहवासं करोति तस्य बुद्धिः जले पतितः तैलबिन्दुः इव विस्तृतिं प्राप्नोति।

**यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे ।**
**कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥**


**तात्पर्यम्** – यस्य जनस्य भाविकृत्यस्य चिन्तनम्, एतावता चिन्तितः विषयश्च अन्यैः ऊहितुं न शक्यते, किन्तु कार्यस्य समाप्तेः अनन्तरमेव सर्वैः अवगम्येत सः जनः धीमान् एव।

**यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।**
**लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥**

**तात्पर्यम्** – स्वयं बुद्धिः यस्य न भवेत् तस्य शास्त्रम् अप्रयोजकं भवति। अन्धस्य दर्पणेन किं प्रयोजनम् ?

## ज्ञानसरित्

श्यामः पटेलः




**सूर्यमण्डलस्थः ग्रहः – "बुधः"** – बुधः सूर्यस्य समीपवर्ती ग्रहः अस्ति। अतः तस्य तापमानम् अत्यधिकं भवति। एषः एव सूर्यमण्डलस्य लघुतमः ग्रहः अस्ति। रात्र्याः अन्तिमे प्रहरे सायङ्काले च पृथ्वीतः दृश्यमानः बुधः सोमः (चन्द्रः) इव कलाः परिवर्तते। पुराणेषु प्रसिद्धा कथा अस्ति यत् चन्द्रस्य तारायां जातः पुत्रः बुधः अस्ति। अतः बुधस्य नाम "सौम्यः" अस्ति। सोमस्य पुत्रः इति सौम्यः।

यथा पिता तथा पुत्रः इत्यनुसारं बुधस्य तले चन्द्रः इव उच्चावचभूमिः अस्ति। कुत्रचित् समतलम् अपि अस्ति। तत्र वायुः नास्ति। अतः तस्य तले घर्षणमपि न भवति। तेन कारणेन तस्य तले निर्मिता आकृतिः कालक्रमेण न परिवर्तते। अपरञ्च वायुमण्डलं नास्ति अतः तत्र क्षणेन घर्मः क्षणेन शैत्यं च सम्भवति।

एषः सौम्यः सूर्यस्य समीपे अस्ति अतः तस्य भ्रमणमार्गः अन्येषां ग्रहाणां भ्रमणमार्गस्य अपेक्षया लघुः अस्ति। सूर्यस्य एकस्यां प्रदक्षिणायां बुधः अस्माकं ८८ दिवसान् यापयति। अतः तत्रत्यम् एकवर्षं पृथ्वीवासिनां ८८ दिवसात्मकं भवति। प्रत्युत, स्वस्य ध्रुवस्य उपरि भ्रमणं कर्तुं ११६ दिवसाः भवन्ति। अतः बुधस्य एकं दिनम् अस्माकं ११६ दिवसात्मकं सुदीर्घं भवति। महत् कौतुकं तु अस्ति यत् सूर्यस्य सन्निधिः अस्ति तथापि बुधतः दृश्यमानः आकाशः सर्वदा कृष्णवर्णीयः एव प्रतीयते।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **शाङ्गर्ः** | विष्णु का धनुष | Vishnu's bow |
| **कौमोदकी** | विष्णु की गदा | Vishnu's club |
| **सदनम्( नपुं. )** | घर | house |
| **वेषः** | वस्त्र | clothes |
| **वनस्थली** | वन्यभूमि | forest-land |
| **पोतः** | नाव | boat, ship |
| **पोताध्यक्षः** | नाव का अध्यक्ष | captain of ship |
| **गह्वरम्** | गुफा | cave |
| **घस्रः** | दिन | day |
| **आमः** | अपक्व, कच्चा | raw |
| **उपाशंसुः** | आशा करनेवाला | one who hopes for |
| **अनुपृष्ठम्** | एक के पीछे एक | one behind other |
| **प्रत्यंशः** | भाग | portion/share |
| **चेल्लम्** | वस्त्र | clothes |
| **चारः** | गुप्तचर | spy |

## किं भवन्तः जानन्ति ?

**१ ) वैष्णोदेवीधाम कस्मिन् राज्ये वर्तते ?**
(क) मध्यप्रदेशे (ख) राजस्थाने (ग) बिहारे (घ) जम्मूकश्मीरे

**२ ) मणिकर्णिका दशाश्वमेधः च कस्मिन् तीर्थस्थले स्तः ?**
(क) वाराणस्याम् (ख) उज्जैन्याम् (ग) प्रयागे (घ) हरिद्वारे

**३ ) प्रसिद्धं जगन्नाथपुरीधाम कस्मिन् राज्ये वर्तते ?**
(क) आन्ध्रप्रदेशे (ख) गुजराते (ग) उड़ीसायाम् (घ) उत्तरांचले

**४ ) वैद्यनाथधाम कस्मिन् राज्ये वर्तते ?**
(क) झारखण्डे (ख) उड़ीसायाम् (ग) केरले (घ) हरियाणायाम्

**५ ) बदरीनाथधाम कस्मिन् राज्ये वर्तते ?**
(क) गुजराते (ख) उत्तरांचले (ग) पञ्जाबे (घ) राजस्थाने

**६ ) प्राचीनकाश्याः वर्तमाने किं नाम वर्तते ?**
(क) कुरुक्षेत्रम् (ख) गया (ग) वाराणसी (घ) पटना

**७ ) प्राचीनलवपुरनगरस्य वर्तमाने किं नाम अस्ति ?**
(क) मथुरा (ख) लाहौर (ग) तक्षशिला (घ) नालन्दा

उत्तराणि – (१) घ (२) क (३) ग (४) क (५) ख (६) ग (७) ख

## Programme Schedule - 2025-26

| Sr No | Month | Programme | Duration & Starting Date | Time | Day | Fees(₹) |
|---|---|---|---|---|---|---|
| 1 | Jan | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 03/01/25 to 31/03/25 | 07:00am to 08:30am | Monday-Wednesday Friday | 6000/- |
| 2 | Jan | संस्कृतभाषाशिक्षणम् ( चतुर्थः स्तरः ) | 03/01/25 to 31/03/25 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 7000/- |
| 3 | Jan | Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) | 03/01/25 to 31/03/25 | 06:00pm to 07:30pm | Monday - Friday | 5000/- |
| 4 | Jan | Theatre in Sanskrit | 07/01/25 to 27/03/25 | 06:00pm to 07:30pm | Tuesday - Thursday | 5000/- |
| 5 | Feb | स्तोत्रपाठः ( निश्चितस्तोत्राणि ) | 04/02/25 to 18/02/25 | 07:00am to 08:30am | Tuesday -Thursday | 500/- |
| 6 | Mar | छन्दःपरिचयः | 03/03/25 to 24/03/25 | 06:30pm to 08:00pm | Monday - Wednesday | 2500/- |
| 7 | April | संस्कृतभाषाशिक्षणम् ( द्वितीयः स्तरः ) | 02/04/25 to 30/06/25 | 07:00am to 08:30am | Monday-Wednesday Friday | 6000/- |
| 8 | April | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 02/04/25 to 30/06/25 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 6000/- |
| 9 | April | स्तोत्रपाठः ( निश्चितस्तोत्राणि ) | 01/04/25 to 15/04/25 | 07:00am to 08:30am | Tuesday -Thursday | 500/- |
| 10 | May | ग्रीष्मवर्गः<br>बालसंस्कृतवर्गः ( Cl.1 to 8 )<br>मार्गदर्शनम्( व्याकरणम् )( Cl.9,10)<br>(with feedback) | 01/05/25 to 11/05/25 | 10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily | 3000/-<br>4000/- |
| 11 | June | Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) Online/Offline | 14/06/25 to 28/03/26 | 06:00pm to 07:30pm | Saturday | 8000/- |
| 12 | June | Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) Offline | 15/06/25 to 29/03/26 | 11:00am to 12:30am | Sunday | 8000/- |
| 13 | June | सन्धिः | 02/06/25 to 25/06/25 | 06:30pm to 08:00pm | Mon - Wed | 3000/- |
| 14 | July | संस्कृतभाषाशिक्षणम् ( प्रथमः स्तरः ) | 02/07/25 to 29/09/25 | 07:00am to 08:30am | Monday-Wednesday Friday | 6000/- |
| 15 | July | संस्कृतभाषाशिक्षणम् ( द्वितीयः स्तरः ) | 02/07/25 to 29/09/25 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 6000/- |
| 16 | July | स्तोत्रपाठः ( शिवमहिम्नस्तोत्रम् ) | 01/07/25 to 15/07/25 | 07:00am to 08:30am | Tuesday - Thursday | 500/- |
| 17 | Aug | स्तोत्रपाठः ( शक्रादयस्तुतिः ) | 05/08/25 to 19/08/25 | 07:00am to 08:30am | Tuesday - Thursday | 500/- |
| 18 | Sept | Diploma in Sanskrit Teaching | 04/09/25 to 28/05/26 | 06:00pm to 08:00pm | Tuesday- Thursday | 10000/- |
| 19 | Oct | संस्कृतभाषाशिक्षणम् ( द्वितीयः स्तरः ) | 06/10/25 to 31/12/25 | 07:00am to 08:30am | Monday-Wednesday Friday | 6000/- |
| 20 | Oct | संस्कृतभाषाशिक्षणम् ( तृतीयः स्तरः ) | 06/10/25 to 31/12/25 | 06:30pm to 08:00pm | Monday-Wednesday Friday | 6000/- |
| 21 | Oct | दीपावलीवर्गः<br>बालसंस्कृतवर्गः ( Skg to 8 )<br>मार्गदर्शनम् ( व्याकरणम् ) ( Cl.9,10 ) | 27/10/25 to 05/11/25 | 10:00am to 11:30am<br>08:00am to 09:30am | Daily<br>Daily | 3000/-<br>3000/- |
| 22 | Nov | Value Education Through Sanskrit बालसंस्कृतवर्गः (Class SKg to 8) Offline | 22/11/25 to 28/03/26 | 06:00pm to 07:30pm | Saturday | 4000/- |

## प्रियवाचकाः

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY

|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006